# ॥ साधुसङ्कुलि तन्त्र ॥

ग्रहपुरश्चरण प्रयोगः

ॐ रक्तपद्मासनं देवं चतुर्बाहुसमन्वितम् ।
क्षत्रियं रक्तवर्नञ्च गोत्रं काश्यपसम्भवं ॥
सप्ताश्वरथमारूढं प्रचण्डं सर्वसिद्धिदम् ।
द्विभुजं रक्तपद्मैश्च संयुक्तं प्रमाद्भुतं ॥
कलिञ्गदेशजं देवं मौलिमाणिक्यभूषणम् ।
त्रिनेत्रं तेजसा पूर्णमुदयाचलसंस्थितं ॥
द्वादशाञ्गुलर्स्विस्तीर्णं प्रबरं घृतकौशिकम् ।
शिवाधिदैवं पुर्वास्यं ब्रह्मप्रत्यधिदैवतं ॥

क्लीं ऐं श्रीं ह्रीं सूर्याय नमः

ॐ शुक्लं शुक्लाम्बरधरं श्वेताब्जस्थं चतुर्भुजम् ।
हारकेयूरनूपुरैर्मण्डितं तमसापहं ॥
सुखदृश्यं सुधायुक्तस्मात्रेयं वैश्यजातिजम् ।
कलङ्काङ्कितसर्वाञ्गं केशपाशातिसुन्दरं ॥
मुकुटेर्मणिमाणिक्यैः शोभनीयन्तु लोचनम् ।
योषित्प्रियं महानन्दं यमुनाजलसम्भवं ॥
उमाधिदैवतं देवमापप्रत्यधिदैवतं ॥

ह्रीं ह्रीं हुं सोमाय स्वाहा

ॐ मेषाधिरूढं द्विभुजं शक्तिचापधरं मुदा ।
रक्तवर्णं महातेजं तेजस्विनां समाकुलं ॥
रक्तवस्त्रपरिधानाम् नानालङ्कारसंयुतम् ।
रक्ताञ्गं धरणीपुत्रं रक्तमाल्यानुलेपनं ॥
हस्ते वराहदशनं पृष्ठे तूणसमन्वितम् ।
कटाक्षाद् भीतिजनकं महामोहप्रदं महत् ॥
महाचापधरं देवं महोग्रमूग्रविग्रहम् ।
स्कन्धादिदैवं सूर्यास्यं क्षितिप्रत्यधिदैवतं ॥

ह्रीं ॐ ऐं कुजाय स्वाहा

ॐ सुतप्तस्वर्णाभतनुं रोमराजिविराजितम् ।
द्विभुजं स्वर्नदण्डेव शरच्चन्द्रनिभाननं ॥
चरणे रत्नमञ्जीरं कुमारं शुभलक्षणम् ।
स्वर्णयज्ञ्योपबीतञ्च पीतबस्त्रयुगाबृतं ॥
अत्रिगोत्रसमुत्पन्नं वैश्यजातिं महाबलम् ।
मागधं महिमापूर्णं द्विनेत्रं द्विभुजं शुभं ॥
नारायणधिदैवञ्च विष्णुप्रत्यधिदैवतम् ।
चिन्तयेत् सोमतनयं सर्वाभिष्टफलप्रदं ॥

ॐ क्लीं ॐ बुधाय स्वाहा

ॐ कनकरुचिरगोउरं चारुमूर्तिं प्रसन्नं
द्विभुजमपि सरजौ संदधानं सुरेज्यम् ।
वसनयुगदधानं पीतवस्त्रं सुभद्रं
सुरवरनरपुज्यमङ्गिरोगोत्रयुक्तम् ।
द्विजबरकुलजातं सिन्धुदेशप्रसिद्धं
त्रिजगति गणश्रेस्ठश्चाधिदैवं तदीयम् ।
सकलगिरिनिहन्ता इन्द्रः प्रत्यधिदैवं
ग्रहगणगुरुनाथं तं भजेऽभिष्टसिद्धौ ।

रं यं ह्रीं ऐं गुरवे नमः

ॐ शुक्लाम्बरंस्शुक्लरुचिं सुदीप्तम् ।
तुषारकुन्देन्दुद्युतिं चतुर्भुजं ॥
इन्द्राधिदैवं शचीप्रत्यधिदैवम् ।
वेदार्थविज्ञं च कविं कवीनां ॥
भृगुगोत्रयुक्तं द्विजजातिमात्रम् ।
दितीन्द्रपूज्यं खलु शुद्धिशान्तं ॥
सर्वार्थसिद्धिप्रदमेव काव्यम् ।
भजेऽप्यहं भोजकतोद्भवं भृगुं ॥

हुं हुं श्रीं श्रीं नं रं शुक्राय स्वाहा

ॐ सोउरिं गृध्रगतातिकृष्णवपुषं कालाग्निवत् सङ्कुलम् ।

संयुक्तं भुजपल्लवैरुपलजस्तम्भैश्चतुर्भिः समैः ॥
भीमं चोग्रमहाबलातिवपुषं बाधागणैः संयुतम् ।
गोत्रं काश्यपजं सुराष्ट्रविभवं कालाग्निदैवं शनिं ॥
वस्त्रैः कृष्णमईर्युतं तनुबरं तं सूर्यसूनुं भजे ॥

ह्रीं क्लीम् शनैश्चराय नमः

ॐ महिषस्थं कृष्णं वदनमयविभुं कर्णनासाक्षिमात्रम् ।
कारालास्यं भीमं गदविभबयुतं श्यामवर्णं महोग्रं ॥
पैठीनं गोत्रयुक्तं रविशशीदमनं चाधिदैवं यमोऽपि ।
सर्पप्रत्यधिदैवं मलयगिरिभवं तं तमसं नमामि ॥

बं ऐं बं बं क्लीं बं तमसे स्वाहा

ॐ महोग्रं धूमाभं करचरणयुतं छिन्नशीर्षं सुदीप्तम् ।
हस्ते वाणं कृपाणं त्रिशिखशशिधृतं वेदहस्तं प्रसन्नं ॥
ब्रह्मा तस्याधिदैवं सकलगदयुतं सर्पप्रत्यधिदैवं ध्यायेत् ।
केतुं विशालं सकलसुरनरे शान्तिदं पुष्टिदञ्च ॥

श्रीं श्रीं आं बं रं लं केतवे स्वाहा

---

Encoded and proofread by Sanjay Rath srath@vsnl.com

---

Please send corrections to sanskrit@cheerful.com
Last updated April 23, 2003